# श्री गणेश नमस्कार स्तोत्रं

## देवा ऊचु:

गजाननाय पूर्णाय सांख्यरूपमयाय ते |
विदेहेन च सर्वत्र संस्थिताय नमो नम: || १ ||

अमेयाय च हेरम्ब परशु धारकाय ते |
मूषक वाहनायैव विश्वेशाय नमो नम: || २ ||

अनन्त विभवायैव परेषां पररूपिणे |
शिवपुत्राय देवाय गुहाग्रजाय ते नम: || ३ ||

पार्वती नन्दनायैव देवानां पालकाय ते |
सर्वेषां पूज्यदेहाय गणेशाय नमो नम: || ४ ||

स्वानन्द वासिने तुभ्यं शिवस्य कुलदैवत |
विष्णवादीनां विशेषेण कुलदेवाय ते नम: || ५ ||

योगाकाराय सर्वेषां योगशान्तिप्रदाय च |
ब्रह्मेशाय नमस्तुभ्यं ब्रह्मभूतप्रदाय ते || ६ ||

सिद्धि बुद्धि पते नाथ सिद्धि बुद्धि प्रदायिने |
मायिने मायिकेभ्यश्च मोहदाय नमो नम: || ७ ||

लम्बोदराय वै तुभ्यं सर्वोदरगताय च |
अमायिने च मायाया आधाराय नमो नम: || ८ ||

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

गज: सर्वस्य बीजं यत्तेन चिह्नेन विघन्प |
योगिनस्त्वां प्रजानन्ति तदाकारा भवन्ति ते || ९ ||

तेन त्वं गजवक्त्रश्च किं स्तुमस्त्वां गजानन |
वेदादयो विकुण्ठाश्च शंकराद्याश्च देवपा: || १० ||

शुक्रादयश्च शेषाद्या: स्तोतुं शक्ता भवन्ति न |
तथापि संस्तुतोसि त्वं स्फूत्र्या त्वद्दर्शनात्मना || ११ ||

|| इति श्री गणेश नमस्कार स्तोत्रं सम्पूर्णं ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133